चौखम्बा स्तोत्र-ग्रन्थमाला

१६

श्रीनटेशसहस्रनामस्तोत्रम्

(नामावली सहितम्)

चौखम्बा संस्कृत प्रतिष्ठान

३८, यू.ए., बंगलो रोड, जवाहर नगर, दिल्ली

मूल्य १५.००

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥श्रीः ॥

॥ श्रीनटेशसहस्रनामस्तोत्रम् ॥

नामावलिसंवलितम्

चौखम्बा संस्कृत प्रतिष्ठान
३८ यू.ए., बंगलो रोड़, जवाहर नगर
दिल्ली ११०००७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मूल्य १५०

अन्य प्राप्तिस्थान
चौखम्बा सुरभारती प्रकाशन
के० ३७/११७, गोपाल मन्दिर लेन
पो० बा० नं० ११२९, वाराणसी २२१००१

चौखम्बा विद्याभवन
चौक (बनारस स्टेट बैंक भवन के पीछे)
पो० बा० नं० १०६९, वाराणसी २२१००१

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीनटेशसहस्रनामस्तोत्रम्

पूर्वपीठिका

यस्मात्सर्वं समुत्पन्नं चराचरमिदं जगत् ।
इदं नमो नटेशाय तस्मै कारुण्यमूर्तये ॥
ओं कैलासशिखरे रम्ये रत्नसिंहासने स्थितम् ।
शङ्करं करुणामूर्तिं प्रणस्य परया मुदा ॥ १ ॥
विनयावनता भूत्वा पप्रच्छ परमेश्वरी ।
भगवन् भव सर्वज्ञ भवतापहराव्यय ॥ २ ॥
त्वत्तः श्रुतं मया देव सर्वं नामसहस्रकम् ।
नटेशस्य तु नामानि न श्रुतानि मया प्रभो ॥ ३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अन्य प्राप्तिस्थान
चौखम्बा सुरभारती प्रकाशन
के० ३७/११७, गोपाल मन्दिर लेन
पो० बा० नं० ११२९, वाराणसी २२१००१

चौखम्बा विद्याभवन
चौक (बनारस स्टेट बैंक भवन के पीछे)
पो० बा० नं० १०६९, वाराणसी २२१००१

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीनटेशसहस्रनामस्तोत्रम्

पूर्वपीठिका

यस्मात्सर्वं समुत्पन्नं चराचरमिदं जगत् ।
इदं नमो नटेशाय तस्मै कारुण्यमूर्तये ॥
ओं कैलासशिखरे रम्ये रत्नसिंहासने स्थितम् ।
शङ्करं करुणामूर्तिं प्रणस्य परया मुदा ॥ १ ॥
विनयावनता भूत्वा पप्रच्छ परमेश्वरी ।
भगवन् भव सर्वज्ञ भवतापहराव्यय ॥ २ ॥
त्वत्तः श्रुतं मया देव सर्वं नामसहस्रकम् ।
नटेशस्य तु नामानि न श्रुतानि मया प्रभो ॥ ३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

असकृत्प्रार्थितोऽपि त्वं न तत्कथितवानसि ।
इदानीं कृपया शंभो वद वाञ्छाभिपूर्तये ॥ ४ ॥

श्री शिव उवाच –

साधु साधु महादेवि पृष्टं सर्वजगद्धितम् ।
पुरा नारायणः श्रीमान् लोकरक्षापरायणः ॥ ५ ॥
क्षीराब्धौ सुचिरं कालं साम्बमूर्तिधरं शिवम् ।
मामेकाग्रेण चित्तेन ध्यायन् न्यवसदच्युतः ॥ ६ ॥
तपसा तस्य सन्तुष्टः प्रसन्नोऽहं कृपावशात् ।
ध्यानात्समुत्थितो विष्णुर्लक्ष्म्या मां पर्यपूजयत् ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तुष्टाव विविधैस्स्तोत्रैर्वेदवेदान्तसम्मितैः ।
वरं वरय हे वत्स यदिष्टं मनसि स्थितम् ॥ ८ ॥
तत्ते दास्यामि न चिरादित्युक्तः कमलेक्षणः ।
प्राह मां परया भक्त्या वरं दास्यसि चेत्प्रभो ॥ ९ ॥
रक्षार्थं सर्वजगतामसुराणां क्षयाय च ।
सार्वात्म्ययोगसिद्ध्यर्थं मन्त्रमेकं ममादिश ॥ १० ॥
इति सम्प्रार्थितस्तेन माधवेनाहमम्बिके ।
सञ्चिन्त्यानुत्तमं स्तोत्रं सर्वेषां सर्वसिद्धिदम् ॥११ ॥
नटेशनामसाहस्रमुक्तवानस्मि विष्णवे ।
तेन जित्वाऽसुरान् सर्वान् ररक्ष सकलं जगत् ॥१२ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सार्वात्म्ययोगसिद्धिं च प्राप्तवानम्बुजेक्षणः ।
तदेव प्रार्थयस्यद्य नामसाहस्रमम्बिके ॥ १३ ॥
पठनान्मननाद्यस्य नृत्तं दर्शयति प्रभुः ।
सर्वपापहरं पुण्यं सर्वरक्षाकरं नृणाम् ॥ १४ ॥
सर्वैश्वर्यप्रदं सर्वसिद्धिदं मुक्तिदं परम् ।
वक्ष्यामि शृणु हे देवि नामसाहस्रमुत्तमम् ॥ १५ ॥

॥ इति पूर्वपीठिका ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीनटेशसहस्रनामस्तोत्रम्

ओं अस्य श्रीनटेशसहस्रनामस्तोत्रमहामन्त्रस्य सदाशिवऋषिः, महाविराट्छन्दः, श्रीमन्नटेशो देवता । बीजं, शक्तिः, कीलकं, अङ्गन्यासकरन्यासौ च चिन्तामणिमन्त्रवत् ।

ध्यानम् –

ध्यायेत्कोटिरविप्रभं त्रिणयनं शीतांशुगङ्गाधरं
दक्षाङ्घ्रिस्थितवामकुञ्चितपदं शार्दूलचर्माम्बरम् ।
वह्निं डोलकराभयं डमरुकं वामे शिवां श्यामलां
कहलारां जपसृक्शुकां कटिकरां देवीं सभेशं भजे ॥

लं पृथिव्यात्मकम् इत्यादिना पञ्चपूजा कार्या ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीशिवा उवाच–

श्रीशिवः श्रीशिवानाथः श्रीमान् श्रीपतिपूजितः ।
शिवङ्करश्शिवतरश्शिष्टहृष्टश्शिवागमः ॥ १ ॥
अखण्डानन्दचिद्रूपः परमानन्दताण्डवः ।
अपस्मृतिन्यस्तपादः कृत्तिवासाः कृपाकरः ॥ २ ॥
कालीवादप्रियः कालः कालातीतः कलाधरः ।
कालनेता कालहन्ता कालचक्रप्रवर्तकः ॥ ३ ॥
कालज्ञः कामदः कान्तः कामारिः कामपालकः ।
कल्याणमूर्त्तिः कल्याणीरमणः कमलेक्षणः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कालकण्ठः कालकालः कालकूटविषाशनः ।
कृतज्ञः कृतिसारज्ञः कृशानुः कृष्णपिङ्गलः ॥ ५ ॥
करिचर्माम्बरधरः कपाली कलुषापहः ।
कपालमालाभरणः कङ्कालः कलिनाशनः ॥ ६ ॥
कैलासवासी कामेशः कविः कपटवर्जितः ।
कमनीयः कलानाथशेखरः कम्बुकन्धरः ॥ ७ ॥
कन्दर्पकोटिसङ्काशः कपर्दी कमलाननः ।
कराब्जधृतकालाग्निः कदम्बकुसुमारुणः ॥ ८ ॥
कमनीयनिजानन्दमुद्राञ्चितकराम्बुजः ।
[illegible] ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उद्दण्डताण्डवश्चण्ड ऊर्ध्वताण्डवपण्डितः ।
सव्यताण्डवसंपन्नो महाताण्डववैभवः ॥ १० ॥
ब्रह्माण्डकाण्डविस्फोटमहाप्रलयताण्डवः ।
महोग्रताण्डवाभिज्ञः परिभ्रमणताण्डवः ॥ ११ ॥
नन्दिनाट्यप्रियो नन्दी नटेशो नटवेषभृत् ।
कालिकानाट्यरसिको निशानटनिश्चलः ॥ १२ ॥
भृङ्गिनाट्यप्रमाणज्ञो भ्रमरायितनाट्यकृत् ।
वियदादिजगत्स्रष्टा विविधानन्ददायकः ॥ १३ ॥
विकाररहितो विष्णुर्विराडीशो विराण्मयः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विराड्हृदयपद्मस्थो विधिर्विश्वाधिको विभुः ॥ १४ ॥
वीरभद्रो विशालाक्षो विष्णुबाणो विशांपतिः ।
विद्यानिधिर्विरूपाक्षो विश्वयोनिर्वृषध्वजः ॥ १५ ॥
विरूपो विश्वदिग्व्यापी वीतशोको विरोचनः ।
व्योमकेशो व्योममूर्तिर्व्योमाकारोऽव्ययाकृतिः ॥ १६ ॥
व्याघ्रपादप्रियो व्याघ्रचर्मधृग्व्याधिनाशनः ।
व्याकृतो व्यापृतो व्यापी व्याप्यसाक्षी विशारदः ॥ १७ ॥
व्यामोहनाशनो व्यासो व्याख्यामुद्रालसत्करः ।
वरदो वामनो वन्द्यो वरिष्ठो वज्रवर्मभृत् ॥ १८ ॥
वेदवेद्यो वेदरूपो वेदवेदान्तवित्तमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वेदार्थविद्वेदयोनिः वेदाङ्गो वेदसंस्तुतः ॥ १९ ॥
वैकुण्ठवल्लभोऽवर्ष्यो वैश्वानरविलोचनः ।
समस्तभुवनव्यापी समृद्धस्सततोदितः ॥ २० ॥
सूक्ष्मात्सूक्ष्मतरः सूर्यः सूक्ष्मस्थूलत्ववर्जितः ।
जह्नुकन्याधरो जन्मजरामृत्युनिवारकः ॥ २१ ॥
शूरसेनः शुभाकारः शुभ्रमूर्तिः शुचिस्मितः ।
अनर्घरत्नखचितकिरीटो निकटे स्थितः ॥ २२ ॥
सुधारूपः सुराध्यक्षः सुभ्रूः सुखघनः सुधीः ।
भ्रदो भद्रपदो भद्रवाहनो भक्तवत्सलः ॥ २३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भगनेत्रहरो भर्गो भवघ्नो भक्तिमन्निधिः ।
अरुणः शरणः शर्वः शरण्यः शर्मदः शिवः ॥ २४ ॥
पवित्रः परमोदारः परमापन्निवारकः ।
सनातनस्समः सत्यः सत्यवादी समृद्धिदः ॥ २५ ॥
धन्वी धनाधिपो धन्यो धर्मगोप्ता धराधिपः ।
तरुणस्तारकस्ताम्रस्तरिष्णुस्तत्त्वबोधकः ॥ २६ ॥
राजराजेश्वरो रम्यो रात्रिञ्चरविनाशनः ।
गह्वरेष्ठो गणाधीशो गणेशो गतिवर्जितः ॥ २७ ॥
पतञ्जलिप्राणनाथः परापरविवर्जितः ।
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
परमात्मा परंज्योतिः परमेष्ठी परात्परः ॥ २८ ॥

नारसिंहो नगाध्यक्षो नादान्तो नादवर्जितः ।
नमदानन्ददो नम्यो नगराजनिकेतनः ॥ २९ ॥
दैव्यो भिषक्प्रमाणज्ञो ब्रह्मण्यो ब्राह्मणात्मकः ।
कृताकृतः कृशः कृष्णः शान्तिदश्शरभाकृतिः ॥ ३० ॥
ब्रह्मविद्याप्रदो ब्रह्मा बृहद्गर्भो बृहस्पतिः ।
सद्यो जातस्सदाराध्यः सामगस्सामसंस्तुतः ॥ ३१ ॥
अघोरोऽद्भुतचारित्र आनन्दवपुरग्रणीः ।
सर्वविद्यानामीशान ईश्वराणामधीश्वरः ॥ ३२ ॥
सर्वार्थः सर्वदा तुष्टः सर्वशास्त्रार्थसम्मतः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सर्वज्ञः सर्वदः स्थाणुः सर्वशस्समरप्रियः ॥ ३३ ॥
जनार्दनो जगत्स्वामी जन्मकर्मनिवारकः ।
मोचको मोहविच्छेत्ता मोदनीयो महाप्रभुः ॥ ३४ ॥
व्युप्तकेशश्च विशदः विष्वक्सेनो विशोधकः ।
सहस्राक्षः सहस्राङ्घ्रिः सहस्रवदनाम्बुजः ॥ ३५ ॥
सहस्राक्षार्चितस्संराट् सन्धाता सम्पदालयः ।
बभ्रुर्बहुविधाकारो बलप्रमथनो बली ॥ ३६ ॥
मनोभर्ता मनोगम्यो मननैकपरायणः ।
उदासीन उपद्रष्टा मौनगम्यो मुनीश्वरः ॥ ३७ ॥
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
अमानी मदनोऽमन्युरमानो मानदो मनुः ।

यशस्वी यजमानात्मा यज्ञभुग्यजनप्रियः ॥ ३८ ॥
मीढुष्टमो मृगधरो मृकण्डुतनयप्रियः ।
पुरुहूतो पुरद्वेषी पुरत्रयविहारवान् ॥ ३९ ॥
पुण्यः पुमान् पुरिशयः पूषा पूर्णः पुरातनः ।
शयनश्शन्तमः शान्तः शासकश्श्यामलाप्रियः ॥ ४० ॥
भावज्ञो बन्धविच्छेत्ता भावातीतोऽभयङ्करः ।
मनीषी मनुजाधीशो मिथ्याप्रत्ययनाशनः ॥ ४१ ॥
निरञ्जनो नित्यशुद्धो नित्यबुद्धो निराशयः ।
निर्विकल्पो निरालम्बो निर्विकारो निरामयः ॥ ४२ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निरङ्कुशो निराधारो निरपायो निरत्ययः ।
गुहाशयो गुणातीतो गुरुमूर्तिर्गुहप्रियः ॥ ४३ ॥
प्रमाणं प्रणवः प्राज्ञः प्राणदः प्राणनायकः ।
सूत्रात्मा सुलभस्स्वच्छः सूदरस्सुन्दराननः ॥ ४४ ॥
कपालमालालङ्कारः कालान्तकवपुर्धरः ।
दुराराध्यो दुराधर्ष्यो दुष्टदूरो दुरासदः ॥ ४५ ॥
दुर्विज्ञेयो दुराचारनाशनो दुर्मदान्तकः ।
सर्वेश्वरः सर्वसाक्षी सर्वात्मा साक्षिवर्जितः ॥ ४६ ॥
सर्वद्वन्द्वक्षयकरः सर्वापद्विनिवारकः ।
सर्वप्रियतमस्सर्वदारिद्र्यक्लेशनाशनः ॥ ४७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

द्रष्टा दर्शयिता दान्तो दक्षिणामूर्तिरूपभृत् ।
दक्षाध्वरहरो दक्षो दहरस्थो दयानिधिः ॥ ४८ ॥
समदृष्टिस्सत्यकामः सनकादिमुनिस्तुतः ।
पतिः पञ्चत्वनिर्मुक्तः पञ्चकृत्यपरायणः ॥ ४९ ॥
पञ्चयज्ञप्रियः पञ्चप्राणाधिपतिरव्ययः ।
पञ्चभूतप्रभुः पञ्चपूजासन्तुष्टमानसः ॥ ५० ॥
विघ्नेश्वरी विघ्नहन्ता शक्तिपाणिश्शरोद्भवः ।
गूढो गुह्यतमो गोप्यो गोरक्षी गणसेवितः ॥ ५१ ॥
सुव्रतस्सत्यसङ्कल्पः स्वसंवेद्यस्सुखावहः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

योगगम्यो योगनिष्ठो योगानन्दो युधिष्ठिरः ॥ ५२ ॥
तत्वावबोधस्तत्वेशः तत्वभावो तपोनिधिः ।
अक्षरस्त्र्यक्षरस्त्र्यक्षः पक्षपातविवर्जितः ॥ ५३ ॥
माणिभद्रार्चितो मान्यो मायावी मान्त्रिको महान् ।
कुठारभृत्कुलाद्रीशः कुञ्चितैकपदाम्बुजः ॥ ५४ ॥
यक्षराड्यज्ञफलदो यज्ञमूर्तिर्यशस्करः ।
सिद्धेशस्सिद्धिजनकः सिद्धान्तस्सिद्धवैभवः ॥ ५५ ॥
रविमण्डलमध्यस्थो रजोगुणविवर्जितः ।
वह्निमण्डलमध्यस्थो वर्षीयान्वरुणेश्वरः ॥ ५६ ॥
सोममण्डलमध्यस्थः सोमस्सौम्यस्सुहृद्वरः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दक्षिणाग्निर्गार्हपत्यो दमनो दमनान्तकः ॥ ५७ ॥
चतुर्वक्त्रश्चक्रधरः पञ्चवक्त्रः परं तपः ।
विश्वस्यायतनो वर्यो वन्दारुजनवत्सलः ॥ ५८ ॥
गायत्रीवल्लभो गार्ग्यो गायकानुग्रहोन्मुखः ।
अनन्तरूप एकात्मा स्वस्तरुर्व्याहृतिस्स्वधा ॥ ५९ ॥
स्वाहारूपो वसुमनाः वटुकः क्षेत्रपालकः ।
श्राव्यश्शत्रुहरश्शूली श्रुतिस्मृतिविधायकः ॥ ६० ॥
अप्रमेयोऽप्रतिरथः प्रद्युम्नः प्रमथेश्वरः ।
अनुत्तमो ह्यदासीनो मुक्तिदो मुदिताननः ॥ ६१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ऊर्ध्वपाच्चोर्ध्वरेतश्च प्रौढनर्तनलम्पटः ।
महामायो महाग्रासो महावीर्यो महाभुजः ॥ ६२ ॥
महानन्दो महास्कन्दो महेन्द्रो महसांनिधिः ।
भ्राजिष्णुर्भावनागम्यः भ्रान्तिज्ञानविनाशनः ॥ ६३ ॥
महर्धिर्महिमाधारो महासेनगुरुर्महः ।
सर्वदृग्सर्वभृत्सर्गः सर्वहृत्कोशसंस्थितः ॥ ६४ ॥
दीर्घपिङ्गजटाजूटो दीर्घबाहुर्दिगम्बरः ।
संयद्वामस्संयमीन्द्रः संशयच्छित्सहस्रदृक् ॥ ६५ ॥
हेतुदृष्टान्तनिर्मुक्तो हेतुर्हेरम्बजन्मभूः ।
हेलाविनिर्मितजगद्धेमश्मश्रुर्हिरण्मयः ॥ ६६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सकृद्विभातस्संवेत्ता सदसत्कोटिवर्जितः ।
स्वात्मस्थस्स्वायुधः स्वामी स्वानन्यस्स्वांशिताखिलः ॥ ६७ ॥
रातिर्दातिश्चतुष्पादः स्वात्मबन्धहरस्स्वभूः ।
वशी वरेण्यो विततो वज्रभृद्वरुणात्मजः ॥ ६८ ॥
चैतन्यश्चिच्छिदद्वैतः चिन्मात्रश्चित्शुभाधिपः ।
भूमा भूतपतिर्भव्यः भूर्भुवो व्याहृतिप्रियः ॥ ६९ ॥
वाच्यवाचकनिर्मुक्तो वागीशो वागगोचरः ।
वेदान्तकृत्तुर्यपादो वैश्रुतस्सुकृतोद्भवः ॥ ७० ॥
अशुभक्षयकृज्ज्योतिः अनाकाशो ह्यलेपकः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आप्तकामोऽनुमन्तात्मकामोऽभिन्नोनणुर्हरः ॥ ७१ ॥

अस्नेहस्सङ्गनिर्मुक्तोऽह्रस्वोऽदीर्घोऽविशेषकः ।

स्वच्छन्दस्स्वच्छसंवित्तिरन्वेष्टव्योऽश्रुतोऽमृतः ॥ ७२ ॥

अपरोक्षोऽव्रणोऽलिङ्गोऽद्वेष्टा श्री प्रेमसागरः ।

ज्ञानलिङ्गे गतिर्ज्ञानी ज्ञानगम्योऽवभासकः ॥ ७३ ॥

शुद्धस्फटिकसङ्काशः श्रुतिप्रस्तुतवैभवः ।

हिरण्यबाहुस्सेनानीः हरिकेशोः दिशां पतिः ॥ ७४ ॥

सस्पिञ्जरः पशुपतिः त्विषीमानध्वनां पतिः ।

बभ्लुशो भगवान्भव्यो विव्याधी विगतज्वरः ॥ ७५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अन्नानां पतिरत्युग्रो हरिकेशोऽद्वयाकृतिः ।

पुष्टानां पतिरव्यग्रो भवहेतुर्जगत्पतिः ॥ ७६ ॥
आततायी महारुद्रः क्षेत्राणामधिपाक्षयः ।
सूतस्सदसस्पतिस्सूरिरहन्त्यो वनपो वरः ॥ ७७ ॥
रोहितस्स्थपतिर्वृक्षपतिर्मन्त्री च वाणिजः ।
कक्षपश्च भुवन्तिश्च भवाख्यो वारिवत्कृतः ॥ ७८ ॥
ओषधीशस्सतामीशः उच्चैर्घोषो विभीषणः ।
पत्तीनामधिपः कृत्स्नवीतो धावत्स सत्वपः ॥ ७९ ॥
सहमानस्सत्यधर्मा विव्याधी नियमो यमः ।
अव्याधिपतिरादित्यः ककुभः कालकोविदः ॥ ८० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निषङ्गीषुधिमदिन्द्रः तस्कराणामधीश्वरः ।
निचरुकः परिचरोऽरण्यानां पतिरद्भुतः ॥ ८१ ॥
सृकावी मुष्णतां नाथः पञ्चाशद्वर्णरूपभृत् ।
नक्तंचरः प्रकृन्तानां पतिर्गिरिचरो गुरुः ॥ ८२ ॥
कुलुञ्चानां पतिः कूप्यो धन्वावी धनदाधिपः ।
आतन्वानश्शतानन्दः गृत्सो गृत्सपतिस्सुरः ॥ ८३ ॥
व्रातो व्रातपतिर्विप्रो वरीवान् क्षुल्लकः क्षमी ।
बिल्मी वरूपी दुन्दुभ्योऽऽहनन्यः प्रमृशाभिधः ॥ ८४ ॥
धृष्णुईतस्तीक्ष्णदंष्ट्रः सुधन्वा सुलभस्सुखी ।
स्रुत्यः पथ्यः स्वतन्त्रस्थः काट्योनीप्यः करोटिभृत् ॥ ८५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सुनिश्चितार्थो राद्धान्तः तत्वमर्थस्तपोमयः ॥ ९५ ॥
हितः प्रमाता प्राग्वर्ती सर्वोपनिषदाशयः ।
विशृङ्खलो वियद्धेतुः विषमो विद्रुमप्रभः ॥ ९६ ॥
अखण्डबोधोऽखण्डात्मा घण्टामण्डलमण्डितः ।
अनन्तशक्तिराचार्यः पुष्कलस्सर्वपूरणः ॥ ९७ ॥
पुरजित्पूर्वकः पुष्पहासः पुण्यफलप्रदः ।
ध्यानगम्यो ध्यातृरूपः ध्येयो धर्मविदां वरः ॥ ९८ ॥
अवशः स्ववशः स्थाणुरन्तर्यामी शतक्रतुः ।
कूटस्थः कूर्मपीठस्थः कूष्माण्डग्रहमोचकः ॥ ९९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कूलङ्कषःकृपासिन्धुः कुशली कुङ्कुमेश्वरः ।
गदाधरो गणस्वामी गरिष्ठस्तोमरायुधः ॥ १०० ॥
जवनो जगदाधारो जमदग्निर्जराहरः ।
जटाधरोऽमृताधारोऽमृतांशुरमृतोद्भवः ॥ १०१ ॥
विद्वत्तमो विदूरस्थो विश्रमो वेदनामयः ।
चतुर्भुजश्शततनुः शमिताखिलकौतुकः ॥ १०२ ॥
वौषट्कारो वषट्कारो हुङ्कारः फट्करः पटुः ।
ब्रह्मिष्ठो ब्रह्मसूत्रार्थो ब्रह्मज्ञो ब्रह्मचेतनः ॥ १०३ ॥
गायको गरुडारूढो गजासुरविमर्दनः ।
गर्वितो गगनावासो ग्रन्थित्रयविभेदनः ॥ १०४ ॥

CC-0. Satyavrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भूतमुक्तावलीतन्तुः भूतपूर्वो भुजङ्गभृत् ।
अतर्क्यस्सूकरः सूरः सत्तामात्रस्सदाशिवः ॥ १०५ ॥
शक्तिपातकरश्शक्तः शाश्वतश्श्रेयसां निधिः ।
अजीर्णस्सुकुमारोऽन्यः पारदर्शी पुरन्दरः ॥ १०६ ॥
अनावरणविज्ञानो निर्विभागो विभावसुः ।
विज्ञानमात्रो विरजाः विरामो विबुधाश्रयः ॥ १०७ ॥
विदग्धमुग्धवेषाढ्यो विश्वातीतो विशोकदः ।
मायानाट्यविनोदज्ञो मायानटनशिक्षकः ॥ १०८ ॥
मायानाटककृन्मायी मायायन्त्रविमोचकः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वृद्धिक्षयविनिर्मुक्तो विद्योतो विश्ववञ्चकः ॥ १०९ ॥
कालात्मा कालिकानाथः काकेटिकविभूषणः ।
षडूर्मिरहितः स्तव्यः षड्गुणैश्वर्यदायकः ॥ ११० ॥
षडाधारगतः सांख्यः षडक्षरसमाश्रयः ।
अनिर्देश्योऽनिलो गम्योऽविक्रियोऽमोघवैभवः ॥ १११ ॥
हेयादेयविनिर्मुक्तो हेलाकलिततापडवः ।
अपर्यन्तोऽपरिच्छेद्योऽगोचरो रुग्विमोचकः ॥ ११२ ॥
निरंशो निगमानन्दो निरानन्दो निदानभूः ।
आदिभूतो महाभूतः स्वेच्छाकलितविग्रहः ॥ ११३ ॥
निस्यन्दः सत्यगानन्दो विनिर्मेयो निरन्तरः ।

CC-0. Sarayu Trust. Digitized by S3 Foundation USA

प्रबुद्धः परमोदारः परमानन्दसागरः ॥ ११४ ॥
संवत्सरः कलापूर्णः सुरासुरनमस्कृतः ।
निर्वाणदो निर्वृतिस्थो निर्वैरो निरुपाधिकः ॥ ११५ ॥
आभास्वरः परं तत्वमादिमः पशलः पविः ।
संशान्तसर्वसङ्कल्पः संसदीशस्सदोदितः ॥ ११६ ॥
भावाभावविनिर्मुक्तो भारूपो भावितो भरः ।
सर्वातीतस्सारतरः साम्बस्सारस्वतप्रदः ॥ ११७ ॥
सर्वकृत्सर्वभृत्सर्वमयस्सत्वावलम्बकः ।
केवलः केशवः केलीकरः केवलनायकः ॥ ११८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इच्छानिच्छाविरहितो विहारी वीर्यवर्धनः ।
विनिघत्यो विगतभीः विपिपासो विभावनः ॥ ११९ ॥
विश्रान्तिभूर्विवसनो विहनहन्ता विशोधकः ।
वीरप्रियो वीतभयो विन्ध्यदर्पविनाशनः ॥ १२० ॥
वेतालनटनप्रीतो वेतण्डत्वक्कृताम्बरः ।
वेलातिलङ्घिकरुणो विलासी विक्रमोन्नतः ॥ १२१ ॥
वैराग्यशेवधिर्विश्वभोक्ता सर्वोर्ध्वसंस्थितः ।
महाकर्ता महाभोक्ता महासंविन्मयो मधुः ॥ १२२ ॥
मनोवचोभिरग्राह्यो महाबिलकृतालयः ।
अमहङ्कृतिरच्छेद्यः स्वानन्दैकघनाकृतिः ॥ १२३ ॥

CC-0. Satyavrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

संवर्ताग्न्युदरस्सर्वान्तरस्थस्सर्वदुर्ग्रहः ।
सम्पन्नस्समङ्क्रमस्सत्री सन्धाता सकलोर्जितः ॥ १२४ ॥
सम्प्रवृद्धस्सन्निकृष्टः संविमृष्टस्समग्रक् ।
संयमस्थस्सन्दुदस्थिः सम्प्रविष्टस्समुत्सुकः ॥ १२५ ॥
सम्प्रदुष्टस्सन्निविष्टः संस्पृष्टस्सम्प्रमर्दनः ।
सूत्रभूतस्स्वप्रकाशः समशीलस्सदादयः ॥ १२६ ॥
सत्वसंस्थस्सुषुप्तिस्थः सुतल्पस्सत्वरूपगः ।
सङ्कल्पोल्लासनिर्मुक्तः समनीरागचेतनः ॥ १२७ ॥
आदित्यवर्णस्संज्योतिः सम्यग्दर्शनतत्परः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

महातात्पर्यनिलयः प्रत्यग्ब्रह्मैक्यनिश्चयः ॥ १२८ ॥
प्रपञ्चोल्लासनिर्मुक्तः प्रत्यक्षः प्रतिभात्मकः ।
प्रवेगः प्रमदार्धाङ्गः प्रनर्तनपरायणः ॥ १२९ ॥
योगयोनिर्यथाभूतो यक्षगन्धर्ववन्दितः ।
जटिलश्चटुलापाङ्गो महानटनलम्पटः ॥ १३० ॥
पाटलांशुः पटुतरः पारिजातस्य मूलगः ।
पापाटवीबृहद्भानुः भानुमत्कोटिकोटिभः ॥ १३१ ॥
कोटिकन्दर्पसौभाग्यसुन्दरो मधुरस्मितः ।
लास्यामृताब्धिलहरीपूर्णेन्दुः पुण्यगोचरः ॥ १३२ ॥
रुद्राक्षस्रङ्मयाकल्पः [illegible] ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अमूल्यमणिसम्भास्वत्फणीन्द्रकरकङ्कणः ॥ १३३ ॥
चिच्छक्तिलोचनानन्दकन्दलः कुन्दपाण्डुरः ।
अगम्यमहिमाम्भोधिरनौपम्ययशोनिधिः ॥ १३४ ॥
चिदानन्दनटाधीशः चित्केवलवपुर्धरः ।
चिदेकरससम्पूर्णः श्रीशिवः श्रीमहेश्वरः ॥ १३५ ॥

॥ इति श्रीनटेशसहस्रनामस्तोत्रं सम्पूर्णम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीनटेशसहस्रनामावलिः

ॐ श्रीशिवाय नमः ।
ॐ श्रीशिवानाथाय नमः ।
ॐ श्रीमते नमः ।
ॐ श्रीपतिपूजिताय नमः ।
ॐ शिवङ्कराय नमः ।
ॐ शिवतराय नमः ।
ॐ शिष्टहृष्टाय नमः ।
ॐ शिवागमाय नमः ।
ॐ अखण्डानन्दचिद्रूपाय नमः ।

ॐ परमानन्दताण्डवाय नमः ।
ॐ अपस्मृतिन्यस्तपादाय नमः ।
ॐ कृत्तिवाससे नमः ।
ॐ कृपाकराय नमः ।
ॐ कालीवादप्रियाय नमः ।
ॐ कालाय नमः ।
ॐ कालातीताय नमः ।
ॐ कलाधराय नमः ।
ॐ कालनेत्रे नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ कालहन्त्रे नमः ।
ॐ कालचक्रप्रवर्तकाय नमः । २०
ॐ कालज्ञाय नमः ।
ॐ कामदाय नमः ।
ॐ कान्ताय नमः ।
ॐ कामारये नमः ।
ॐ कामपालकाय नमः ।
ॐ कल्याणमूर्तये नमः ।
ॐ कल्याणीरमणाय नमः ।
ॐ कमलेक्षणाय नमः ।
ॐ कालकण्ठाय नमः ।
ॐ कालकालाय नमः । ३०
ॐ कालकूटविषाशनाय नमः ।
ॐ कृतज्ञाय नमः ।
ॐ कृतिसारज्ञाय नमः ।
ॐ कृशानवे नमः ।
ॐ कृष्णपिङ्गलाय नमः ।
ॐ करिचर्माम्बरधराय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ कपालिने नमः ।

ॐ कलुषापहाय नमः ।

ॐ कपालमालाभरणाय नमः ।

ॐ कङ्कालाय नमः । ४०

ॐ कीलनाशनाय नमः ।

ॐ कैलासवासिने नमः ।

ॐ कामेशाय नमः ।

ॐ कवये नमः ।

ॐ कपटवर्जिताय नमः ।

ॐ कमनीयाय नमः ।

ॐ कलानाथशेखराय नमः ।

ॐ कम्बुकन्धराय नमः ।

ॐ कन्दर्पकोटिसङ्काशाय नमः ।

ॐ कपर्दिने नमः । ५०

ॐ कमलाननाय नमः ।

ॐ कराब्जधृतका-
लाग्नये नमः ।

ॐ कदम्बकुसुमारुणाय नमः ।

ॐ कमनीयनिजानन्दमुद्रा-
ञ्चितकराम्बुजाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ स्फुरद्डमरुनिध्वाननिर्जि-
ताम्भोधिनिस्वनाय नमः ।
ॐ उद्दण्डताण्डवाय नमः ।
ॐ चण्डाय नमः ।
ॐ ऊर्ध्वताण्डवपण्डिताय नमः ।
ॐ सव्यताण्डवसम्पन्नाय नमः ।
ॐ महाताण्डववैभवाय नमः । ६०
ॐ ब्रह्माण्डकाण्डविस्फोट-
महाप्रलयताण्डवाय नमः ।
ॐ महोग्रताण्डवाभिज्ञाय नमः ।
ॐ परिभ्रमणताण्डवाय नमः ।
ॐ नन्दिनाट्यप्रियाय नमः ।
ॐ नन्दिने नमः ।
ॐ नटेशाय नमः ।
ॐ नटवेषभृते नमः ।
ॐ कालिकानाट्यरसि-
काय नमः ।
ॐ निशानटनिश्चलाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ भृङ्गिनाट्यप्रमाणज्ञाय नमः ।७०
ॐ भ्रमरायितनाट्यकृते नमः ।
ॐ वियदादिजगत्स्रष्ट्रे नमः ।
ॐ विविधानन्ददायकायः नमः ।
ॐ विकाररहिताय नमः ।
ॐ विष्णवे नमः ।
ॐ विराडीशाय नमः ।
ॐ विराण्मयाय नमः ।
ॐ विराड्हृदयपद्मस्थाय नमः ।
ॐ विधये नमः ।

ॐ विश्वाधिकाय नमः ।८०
ॐ विभवे नमः ।
ॐ वीरभद्राय नमः ।
ॐ विशालाक्षाय नमः ।
ॐ विष्णुबाणाय नमः ।
ॐ विशांपतये नमः ।
ॐ विद्यानिधये नमः ।
ॐ विरूपाक्षाय नमः ।
ॐ विश्वयोनये नमः ।
ॐ वृषध्वजाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ विरूपाय नमः । ९०
ॐ विश्वदिग्व्यापिने नमः ।
ॐ वीतशोकाय नमः ।
ॐ विरोचनाय नमः ।
ॐ व्योमकेशाय नमः ।
ॐ व्योममूर्तये नमः ।
ॐ व्योमाकाराय नमः ।
ॐ अव्ययाकृतये नमः ।
ॐ व्याघ्रपादप्रियाय नमः ।
ॐ व्याघ्रचर्मधृते नमः ।
ॐ व्याधिनाशनाय नमः । १००
ॐ व्यापृताय नमः ।
ॐ व्याकृताय नमः ।
ॐ व्यापिने नमः ।
ॐ व्याप्यसाक्षिणे नमः ।
ॐ विशारदाय नमः ।
ॐ व्यामोहनाशनाय नमः ।
ॐ व्यासाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ व्याख्यामुद्राल-
सत्काराय नमः ।
ॐ वरदाय नमः ।
ॐ वामनाय नमः । ११०
ॐ वन्द्याय नमः ।
ॐ वरिष्ठाय नमः ।
ॐ वज्रवर्मभृते नमः ।
ॐ वेदवेद्याय नमः ।
ॐ वेदस्तवाय नमः ।
ॐ वेदवेदान्तवित्तमाय नमः ।

ॐ वेदार्थविदे नमः ।
ॐ वेदयोनये नमः ।
ॐ वेदाङ्गाय नमः ।
ॐ वेदसंस्तुताय नमः । १२०
ॐ वैकुण्ठवल्लभाय नमः ।
ॐ अवर्ध्याय नमः ।
ॐ वैश्वानरविलोचनाय नमः ।
ॐ समस्तभुवनव्यापिने नमः ।
ॐ समृद्धाय नमः ।
ॐ सततोदिताय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सूक्ष्मात्सूक्ष्मतराय नमः ।
ॐ स्थूलाय नमः ।
ॐ सूक्ष्मस्थूलत्ववर्जिताय नमः ।
ॐ जन्हुकन्याधराय नमः । १३०
ॐ जन्मजरामृत्युनिवार-
काय नमः ।
ॐ शूरसेनाय नमः ।
ॐ शुभाकाराय नमः ।
ॐ शुभ्रमूर्तये नमः ।
ॐ शुचिस्मिताय नमः ।
ॐ अनर्घरत्नखचितकिरी-
टाय नमः ।
ॐ निकटे स्थिताय नमः ।
ॐ सुधारूपाय नमः ।
ॐ सुराध्यक्षाय नमः ।
ॐ सुभ्रुवै नमः । १४०
ॐ सुखघनाय नमः ।
ॐ सुधियै नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ भद्राय नमः ।
ॐ भद्रपदाय नमः ।
ॐ भद्रवाहनाय नमः ।
ॐ भक्तवत्सलाय नमः ।
ॐ भगनेत्रहराय नमः ।
ॐ भर्गाय नमः ।
ॐ भवघ्नाय नमः ।
ॐ भक्तिमन्निधये नमः ।
ॐ अरुणाय नमः ।
ॐ शरणाय नमः ।

ॐ शर्वाय नमः ।
ॐ शरण्याय नमः ।
ॐ शर्मदाय नमः ।
ॐ शिवाय नमः ।
ॐ पवित्राय नमः ।
ॐ परमोदाराय नमः ।
ॐ परमापन्निवारकाय नमः ।
ॐ सनातनाय नमः । १६०
ॐ समाय नमः ।
ॐ सत्याय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सत्यवादिने नमः ।
ॐ समृद्धिदाय नमः ।
ॐ धन्विने नमः ।
ॐ धनाधिपाय नमः ।
ॐ धन्याय नमः ।
ॐ धर्मगोप्त्रे नमः ।
ॐ धराधिपाय नमः ।
ॐ तरुणाय नमः । १७०
ॐ तारकाय नमः ।
ॐ ताम्राय नमः ।
ॐ तरिष्णवे नमः ।
ॐ तत्वबोधकाय नमः ।
ॐ राजराजेश्वराय नमः ।
ॐ रम्याय नमः ।
ॐ रात्रिज्वरविनाशनाय नमः ।
ॐ गह्वरेष्ठाय नमः ।
ॐ गणाधीशाय नमः ।
ॐ गणेशाय नमः । १८०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ गतिवर्जिताय नमः ।
ॐ पतञ्जलिप्राणनाथाय नमः ।
ॐ परापरविवर्जिताय नमः ।
ॐ परमात्मने नमः ।
ॐ परंज्योतिषे नमः ।
ॐ परमेष्ठिने नमः ।
ॐ परात्पराय नमः ।
ॐ नारसिंहाय नमः ।
ॐ नगाध्यक्षाय नमः ।
ॐ नादान्ताय नमः । १९०

ॐ नादवर्जिताय नमः ।
ॐ नमदानन्ददाय नमः ।
ॐ नम्याय नमः ।
ॐ नगराजनिकेतनाय नमः ।
ॐ दैव्याय नमः ।
ॐ भिषजे नमः ।
ॐ प्रमाणज्ञाय नमः ।
ॐ ब्रह्मण्याय नमः ।
ॐ ब्राह्मणात्मकाय नमः ।
ॐ कृताकृताय नमः । २००

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ कृशाय नमः ।
ॐ कृष्णाय नमः ।
ॐ शान्तिदाय नमः ।
ॐ शरभाकृतये नमः ।
ॐ ब्रह्मविद्याप्रदाय नमः ।
ॐ ब्रह्मणे नमः ।
ॐ बृहद्गर्भाय नमः ।
ॐ बृहस्पतये नमः ।
ॐ सद्योजाताय नमः ।
ॐ सदाराध्याय नमः ।२१०
ॐ सामगाय नमः ।
ॐ सामसंस्तुताय नमः ।
ॐ अघोराय नमः ।
ॐ अद्भुतचारित्राय नमः ।
ॐ आनन्दवपुषे नमः ।
ॐ अग्रण्ये नमः ।
ॐ सर्वविद्यानामीशानाय नमः ।
ॐ ईश्वराणामधीश्वराय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सर्वार्थाय नमः ।

ॐ सर्वदातुष्टाय नमः । २२०

ॐ सर्वशास्त्रार्थसम्मताय नमः ।

ॐ सर्वज्ञाय नमः ।

ॐ सर्वदाय नमः ।

ॐ स्थाणवे नमः ।

ॐ सर्वेशाय नमः ।

ॐ समरप्रियाय नमः ।

ॐ जनार्दनाय नमः ।

ॐ जगत्स्वामिने नमः ।

ॐ जन्मकर्मनिवारकाय नमः ।

ॐ मोचकाय नमः । २३०

ॐ मोहविच्छेत्रे नमः ।

ॐ मोदनीयाय नमः ।

ॐ महाप्रभवे नमः ।

ॐ व्युप्तकेशाय नमः ।

ॐ विशदाय नमः ।

ॐ विष्वक्सेनाय नमः ।

ॐ विशोधकाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सहस्राक्षाय नमः ।

ॐ सहस्राङ्घ्रये नमः ।
ॐ सहस्रवदनाम्बुजाय नमः । २४०
ॐ सहस्राक्षार्चिताय नमः ।
ॐ सम्राजे नमः ।
ॐ सन्धात्रे नमः ।
ॐ संपदालयाय नमः ।
ॐ बभ्रुवे नमः ।
ॐ बहुविधाकाराय नमः ।
ॐ बलप्रमथनाय नमः ।
ॐ बलिने नमः ।
ॐ मनोभर्त्रे नमः ।
ॐ मनोगम्याय नमः । २५०
ॐ मननैकपरायणाय नमः ।
ॐ उदासीनाय नमः ।
ॐ उपद्रष्ट्रे नमः ।
ॐ मौनगम्याय नमः ।
ॐ मुनीश्वराय नमः ।
ॐ अमानिने नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ मदनाय नमः ।
ॐ अमन्यवे नमः ।
ॐ अमानाय नमः ।
ॐ मानदाय नमः । २६०
ॐ मनवे नमः ।
ॐ यशस्विने नमः ।
ॐ यजमानात्मने नमः ।
ॐ यज्ञभुजे नमः ।
ॐ यजनप्रियाय नमः ।
ॐ मीढुष्टमाय नमः ।

ॐ मृगधराय नमः ।
ॐ मृकण्डुतनयप्रियाय नमः ।
ॐ पुरुहूताय नमः ।
ॐ पुरद्वेषिणे नमः ।२७०
ॐ पुरत्रयविहारवते नमः ।
ॐ पुण्याय नमः ।
ॐ पुंसे नमः ।
ॐ पुरिशयाय नमः ।
ॐ पूष्णे नमः ।
ॐ पूर्णाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ पुरातनाय नमः ।
ॐ शयनाय नमः ।
ॐ शन्तमाय नमः ।
ॐ शान्ताय नमः । २८०
ॐ शासकाय नमः ।
ॐ श्यामलाप्रियाय नमः ।
ॐ भावज्ञाय नमः ।
ॐ बन्धविच्छेत्रे नमः ।
ॐ भावातीताय नमः ।
ॐ अभयङ्कराय नमः ।
ॐ मनीषिणे नमः ।
ॐ मनुजाधीशाय नमः ।
ॐ मिथ्याप्रत्ययनाशनाय नमः ।
ॐ निरञ्जनाय नमः । २९०
ॐ नित्यशुद्धाय नमः ।
ॐ नित्यबुद्धाय नमः ।
ॐ निराशयाय नमः ।
ॐ निर्विकल्पाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ निरालम्बाय नमः ।
ॐ निर्विकाराय नमः ।
ॐ निरामयाय नमः ।
ॐ निरंकुशाय नमः ।
ॐ निराधाराय नमः ।
ॐ निरपायाय नमः । ३००
ॐ निरत्ययाय नमः ।
ॐ गुहाशयाय नमः ।
ॐ गुणातीताय नमः ।
ॐ गुरुमूर्तये नमः ।

ॐ गुहप्रियाय नमः ।
ॐ प्रमाणाय नमः ।
ॐ प्रणवाय नमः ।
ॐ प्राज्ञाय नमः ।
ॐ प्राणदाय नमः ।
ॐ प्राणनायकाय नमः ।३१०
ॐ सूत्रात्मने नमः ।
ॐ सुलभाय नमः ।
ॐ स्वच्छाय नमः ।
ॐ सूदराय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सुन्दराननाय नमः ।
ॐ कपालमालालङ्कृताय नमः ।
ॐ कालान्तकवपुर्धराय नमः ।
ॐ दुराराध्याय नमः ।
ॐ दुराधर्ष्याय नमः ।
ॐ दुष्टदूराय नमः । ३२०
ॐ दुरासदाय नमः ।
ॐ दुर्विज्ञेयाय नमः ।
ॐ दुराचारनाशनाय नमः ।
ॐ दुर्मदान्तकाय नमः ।
ॐ सर्वेश्वराय नमः ।
ॐ सर्वसाक्षिणे नमः ।
ॐ सर्वात्मने नमः ।
ॐ साक्षिवर्जिताय नमः ।
ॐ सर्वद्वन्द्वक्षयकराय नमः ।
ॐ सर्वापद्विनिवारकाय नमः ।
ॐ सर्वप्रियतमाय नमः ।
ॐ सर्वदारिद्र्यक्लेशनाशनाय ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ द्रष्ट्रे नमः ।

ॐ दर्शयित्रे नमः ।

ॐ दान्ताय नमः ।

ॐ दक्षिणामूर्तिरूपभृते नमः ।

ॐ दक्षाध्वरहराय नमः ।

ॐ दक्षाय नमः ।

ॐ दहरस्थाय नमः ।

ॐ दयानिधये नमः ।३४०

ॐ समदृष्टये नमः ।

ॐ सत्यकामाय नमः ।

ॐ सनकादिमुनिस्तुताय नमः ।

ॐ पत्ये नमः ।

ॐ पञ्चत्वनिर्मुक्ताय नमः ।

ॐ पञ्चकृत्यपरायणाय नमः ।

ॐ पञ्चयज्ञप्रियाय नमः ।

ॐ पञ्चप्राणाधिपतये नमः ।

ॐ अव्ययाय नमः ।

ॐ पञ्चभूतप्रभवे नमः ।३५०

ॐ पञ्चपूजासन्तुष्ट-
मानसाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ विघ्नेश्वराय नमः ।
ॐ विघ्नहन्त्रे नमः ।
ॐ शक्तिपाणये नमः ।
ॐ शरोद्भवाय नमः ।
ॐ गूढाय नमः ।
ॐ गुह्यतमाय नमः ।
ॐ गोप्याय नमः ।
ॐ गोरक्षिणे नमः ।
ॐ गणसेविताय नमः । ३६०

ॐ सुव्रताय नमः ।
ॐ सत्यसङ्कल्पाय नमः ।
ॐ स्वसंवेद्याय नमः ।
ॐ सुखावहाय नमः ।
ॐ योगगम्याय नमः ।
ॐ योगनिष्ठाय नमः ।
ॐ योगानन्दाय नमः ।
ॐ युधिष्ठिराय नमः ।
ॐ तत्वावबोधाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ तत्वेशाय नमः ।३७०

ॐ तत्वभावाय नमः ।

ॐ तपोनिधये नमः ।

ॐ अक्षराय नमः ।

ॐ त्र्यक्षराय नमः ।

ॐ त्र्यक्षाय नमः ।

ॐ पक्षपातविवर्जिताय नमः ।

ॐ माणिभद्रार्चिताय नमः ।

ॐ मान्याय नमः ।

ॐ मायाविने नमः ।

ॐ मान्त्रिकाय नमः ।३८०

ॐ महते नमः ।

ॐ कुठारभृते नमः ।

ॐ कुलाद्रीशाय नमः ।

ॐ कुञ्चितैकपदाम्बुजाय नमः ।

ॐ यक्षराजे नमः ।

ॐ यज्ञफलदाय नमः ।

ॐ यज्ञमूर्तये नमः ।

ॐ यशस्कराय नमः ।

ॐ सिद्धेशाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सिद्धिजनकाय नमः ।३९०
ॐ सिद्धान्ताय नमः ।
ॐ सिद्धवैभवाय नमः ।
ॐ रविमण्डलमध्यस्थाय नमः ।
ॐ रजोगुणविवर्जिताय नमः ।
ॐ वह्निमण्डलमध्यस्थाय नमः ।
ॐ वर्षीयसे नमः ।
ॐ वरुणेश्वराय नमः ।
ॐ सोममण्डलमध्यस्थाय नमः ।
ॐ सोमाय नमः ।
ॐ सौम्याय नमः ।४००
ॐ सुहृद्वराय नमः ।
ॐ वराय नमः ।
ॐ दक्षिणाग्नये नमः ।
ॐ गार्हपत्याय नमः ।
ॐ दमनाय नमः ।
ॐ दमनान्तकाय नमः ।
ॐ चतुर्वक्त्राय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ चक्रधराय नमः ।

ॐ पञ्चवक्त्राय नमः ।

ॐ परन्तपाय नमः । ४१०

ॐ विश्वस्यायतनाय नमः ।

ॐ वर्याय नमः ।

ॐ वन्दारुजनवत्सलाय नमः ।

ॐ गायत्रीवल्लभाय नमः ।

ॐ गार्ग्याय नमः ।

ॐ गायकानुग्रहोन्मुखाय नमः ।

ॐ अनन्तरूपाय नमः ।

ॐ एकात्मने नमः ।

ॐ स्वस्तरवे नमः ।

ॐ व्याहृतये नमः । ४२०

ॐ स्वधायै नमः ।

ॐ स्वाहारूपाय नमः ।

ॐ वसुमनसे नमः ।

ॐ वटुकाय नमः ।

ॐ क्षेत्रपालकाय नमः ।

ॐ श्राव्याय नमः ।

ॐ शत्रुहराय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ शूलिने नमः ।
ॐ श्रुतिस्मृतिविधायकाय नमः ।
ॐ अप्रमेयाय नमः । ४३०
ॐ अप्रतिरथाय नमः ।
ॐ प्रद्युम्नाय नमः ।
ॐ प्रमथेश्वराय नमः ।
ॐ अनुत्तमाय नमः ।
ॐ उदासीनाय नमः ।
ॐ मुक्तिदाय नमः ।
ॐ मुदिताननाय नमः ।
ॐ ऊर्ध्वपदे नमः ।
ॐ ऊर्ध्वरेतसे नमः ।
ॐ प्रौढनर्तनलम्पटाय नमः ।
ॐ महामायाय नमः ।
ॐ महाग्रासाय नमः ।
ॐ महावीर्याय नमः ।
ॐ महाभुजाय नमः ।
ॐ महानन्दाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ महास्कन्दाय नमः ।

ॐ महेन्द्राय नमः ।

ॐ महसां निधये नमः ।

ॐ भ्राजिष्णवे नमः ।

ॐ भावनागम्याय नमः । ४५०

ॐ भ्रान्तिज्ञानविनाश-
नाय नमः ।

ॐ महर्द्धये नमः ।

ॐ महिमाधाराय नमः ।

ॐ महासेनगुरवे नमः ।

ॐ महसे नमः ।

ॐ सर्वदृशे नमः ।

ॐ सर्वभृते नमः ।

ॐ सर्गाय नमः ।

ॐ सर्वहृत्कोशसंस्थिताय नमः ।

ॐ दीर्घपिङ्गजटाजूटाय नमः ।४६०

ॐ दीर्घबाहवे नमः ।

ॐ दिगम्बराय नमः ।

ॐ संयद्वासाय नमः ।

ॐ संयमीन्द्राय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ संशयच्छिदे नमः ।
ॐ सहस्रदृशे नमः ।
ॐ हेतुदृष्टान्तनिर्मुक्ताय नमः ।
ॐ हेतवे नमः ।
ॐ हरेम्बजन्मभुवे नमः ।
ॐ हेलाविनिर्मितजगते नमः । ४७०
ॐ हेमश्मश्रुवे नमः ।
ॐ हिरण्मयाय नमः ।
ॐ सकृद्विभाताय नमः ।
ॐ संवेत्रे नमः ।
ॐ सदसत्कोटिवर्जिताय नमः ।
ॐ स्वात्मस्थाय नमः ।
ॐ स्वायुधाय नमः ।
ॐ स्वामिने नमः ।
ॐ स्वानन्याय नमः ।
ॐ स्वांशिताखिलाय नमः । ४८०
ॐ रातये नमः ।
ॐ दातये नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ चतुष्पादाय नमः ।
ॐ स्वात्मबन्धहराय नमः ।
ॐ स्वभुवे नमः ।
ॐ वशिने नमः ।
ॐ वरेण्याय नमः ।
ॐ विततात्मने नमः ।
ॐ वज्रभृते नमः ।
ॐ वरुणात्मजाय नमः । ४९०
ॐ चैतन्याय नमः ।
ॐ चिच्छिदे नमः ।

ॐ अद्वैताय नमः ।
ॐ चिन्मात्राय नमः ।
ॐ चित्शुभाधिपाय नमः ।
ॐ भूम्ने नमः ।
ॐ भूतपतये नमः ।
ॐ भव्याय नमः ।
ॐ भूर्भुवोव्याहृतिप्रियाय नमः ।
ॐ वाच्यवाचकनिर्मुक्ताय नमः ।५००
ॐ वागीशाय नमः ।
ॐ वागगोचराय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ वेदान्तकृते नमः ।
ॐ तुर्यपादाय नमः ।
ॐ वैद्युताय नमः ।
ॐ सुकृतोद्भवाय नमः ।
ॐ अशुभक्षयकृते नमः ।
ॐ ज्योतिषे नमः ।
ॐ अनाकाशाय नमः ।
ॐ अलेपकाय नमः । ५१०
ॐ आप्तकामाय नमः ।
ॐ अनुमन्त्रे नमः ।
ॐ आप्तकामाय नमः ।
ॐ अभिन्नाय नमः ।
ॐ अनणवे नमः ।
ॐ हराय नमः ।
ॐ अस्नेहाय नमः ।
ॐ सङ्गनिर्मुक्ताय नमः ।
ॐ अह्रस्वाय नमः ।
ॐ अदीर्घाय नमः ।५२०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ अविशेषकाय नमः ।

ॐ स्वच्छन्दाय नमः ।

ॐ स्वच्छसंवित्तये नमः ।

ॐ अन्वेष्टव्याय नमः ।

ॐ अश्रुताय नमः ।

ॐ अमृताय नमः ।

ॐ अपरोक्षाय नमः ।

ॐ अव्रणाय नमः ।

ॐ अलिङ्गाय नमः ।

ॐ अद्वैष्ट्रे नमः १५३०

ॐ प्रेमसागराय नमः ।

ॐ ज्ञानलिङ्गाय नमः ।

ॐ गतये नमः

ॐ ज्ञानिने नमः ।

ॐ ज्ञानगम्याय नमः ।

ॐ अवभासकाय नमः ।

ॐ शुद्धस्फटिकसङ्काशाय नमः ।

ॐ श्रुतिप्रस्तुतवैभवाय नमः ।

ॐ हिरण्यबाहवे नमः ।

ॐ सेनामये नमः १५४०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ हरिकेशाय नमः ।
ॐ दिशांपतये नमः ।
ॐ सस्पिञ्जराय नमः ।
ॐ पशुपतये नमः ।
ॐ त्विषीमते नमः ।
ॐ अध्वनांपतये नमः ।
ॐ बभ्लुशाय नमः ।
ॐ भगवते नमः ।
ॐ भव्याय नमः ।

ॐ विव्याधिने नमः । ५५०
ॐ विगतज्वराय नमः ।
ॐ अन्नानांपतये नमः ।
ॐ अत्युग्राय नमः ।
ॐ हरिकेशाय नमः ।
ॐ अद्वयाकृतये नमः ।
ॐ पुष्टानांपतये नमः ।
ॐ अव्यग्राय नमः ।
ॐ भवहेतवे नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ जगत्पतये नमः ।
ॐ आततायिने नमः । ५६०
ॐ महारुद्राय नमः ।
ॐ क्षेत्राणामधिपाय नमः ।
ॐ अक्षाय नमः ।
ॐ सूताय नमः ।
ॐ सदसस्पतये नमः ।
ॐ सूरये नमः ।
ॐ अहन्त्याय नमः ।
ॐ वनपाय नमः ।
ॐ वराय नमः ।
ॐ रोहिताय नमः । ५७०
ॐ स्थपतये नमः ।
ॐ वृक्षपतये नमः ।
ॐ मन्त्रिणे नमः ।
ॐ वाणिजाय नमः ।
ॐ कक्षपाय नमः ।
ॐ भुवन्तये नमः ।
ॐ भवाख्याय नमः ।
ॐ वारिवस्कृताय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ ओषधीशाय नमः ।
ॐ सतामीशाय नमः ।५८०
ॐ उच्चैर्घोषाय नमः ।
ॐ विभीषणाय नमः ।
ॐ पतीनामधिपाय नमः ।
ॐ कृत्स्नवीताय नमः ।
ॐ धावते नमः ।
ॐ तस्मै नमः ।
ॐ सत्वपाय नमः ।
ॐ सहमानाय नमः ।
ॐ सत्यधर्मणे नमः ।
ॐ विव्याधिने नमः ।५९०
ॐ नियमाय नमः ।
ॐ यमाय नमः ।
ॐ अव्याधिपतये नमः ।
ॐ आदित्याय नमः ।
ॐ ककुभाय नमः ।
ॐ कालकोविदाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ निषङ्गिणे नमः ।
ॐ इषुधिमते नमः ।
ॐ इन्द्राय नमः ।
ॐ तस्कराणामधीश्वराय नमः ।
ॐ निचरुकाय नमः ।
ॐ परिचराय नमः ।
ॐ अरण्यानांपतये नमः ।
ॐ अद्भुताय नमः ।
ॐ सृकाविने नमः ।
ॐ मुष्णतांनाथाय नमः ।

ॐ पञ्चाशद्वर्णरूपभृते नमः ।
ॐ नक्तञ्चराय नमः ।
ॐ प्रकृन्तानांपतये नमः ।
ॐ गिरिचराय नमः । ६१०
ॐ गुरवे नमः ।
ॐ कुलुञ्चानांपतये नमः ।
ॐ कूप्याय नमः ।
ॐ धन्वाविने नमः ।
ॐ धनदाधिपाय नमः ।
ॐ आतन्वानाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ शतानन्दाय नमः ।
ॐ गृत्साय नमः ।
ॐ गृत्सपतये नमः ।
ॐ सुराय नमः । ६२०
ॐ व्राताय नमः ।
ॐ व्रातपतये नमः ।
ॐ विप्राय नमः ।
ॐ वरीयसे नमः ।
ॐ क्षुल्लकाय नमः ।
ॐ क्षमिणे नमः ।
ॐ बिल्मिने नमः ।
ॐ वरूथिने नमः ।
ॐ दुन्दुभ्याय नमः ।
ॐ आहनन्याय नमः । ६३०
ॐ प्रमृशांभिधाय नमः ।
ॐ धृष्णवे नमः ।
ॐ दूताय नमः ।
ॐ तीक्ष्णदंष्ट्राय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सुधन्वने नमः ।
ॐ सुलभाय नमः ।
ॐ सुखिने नमः ।
ॐ स्रुत्याय नमः ।
ॐ पथ्याय नमः ।
ॐ स्वतन्त्रस्थाय नमः । ६४०
ॐ काट्याय नमः ।
ॐ नीप्याय नमः ।
ॐ करोटिभृते नमः ।
ॐ सूद्याय नमः ।

ॐ सरस्याय नमः ।
ॐ वैशन्ताय नमः ।
ॐ नाद्याय नमः ।
ॐ अवट्याय नमः ।
ॐ वर्षकाय नमः ।
ॐ विद्युत्याय नमः । ६५०
ॐ विशदाय नमः ।
ॐ मेध्याय नमः ।
ॐ रेष्मियाय नमः ।
ॐ वास्तुपाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ वसवे नमः ।
ॐ अग्रेवधाय नमः ।
ॐ अग्रेसंपूज्याय नमः ।
ॐ हन्त्रे नमः ।
ॐ ताराय नमः ।
ॐ मयोभवाय नमः । ६६०
ॐ मयस्कराय नमः ।
ॐ महातीर्थ्याय नमः ।
ॐ कूल्याय नमः ।
ॐ पार्याय नमः ।
ॐ पदात्मकाय नमः ।
ॐ शङ्खाय नमः ।
ॐ प्रतरणाय नमः ।
ॐ अवार्याय नमः ।
ॐ फेन्याय नमः ।
ॐ शष्प्याय नमः । ६७०
ॐ प्रवाहजाय नमः ।
ॐ मुनये नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ आतार्याय नमः ।
ॐ आलाद्याय नमः ।
ॐ सिकत्याय नमः ।
ॐ किंशिलाय नमः ।
ॐ पुलस्त्याय नमः ।
ॐ क्षयणाय नमः ।
ॐ गृद्र्याय नमः ।
ॐ गोष्ठ्याय नमः । ६८०
ॐ गोपरिपालकाय नमः ।
ॐ शुष्क्याय नमः ।

ॐ हरित्याय नमः ।
ॐ लोप्याय नमः ।
ॐ सूर्म्याय नमः ।
ॐ पर्ण्याय नमः ।
ॐ अणिमादिभुवे नमः ।
ॐ पर्णशद्याय नमः ।
ॐ प्रत्यगात्मने नमः ।
ॐ प्रसन्नाय नमः ।६९०
ॐ परमोन्नताय नमः ।
ॐ शीघ्रियाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ शीभ्याय नमः ।
ॐ आनन्दाय नमः ।
ॐ क्षयद्वीराय नमः ।
ॐ शराय नमः ।
ॐ अक्षराय नमः ।
ॐ पाशिने नमः ।
ॐ पातकसंहर्त्रे नमः ।
ॐ तीक्ष्णेषवे नमः ।७००
ॐ तिमिरापहाय नमः ।
ॐ वराभयप्रदाय नमः ।
ॐ ब्रह्मपुच्छाय नमः ।
ॐ ब्रह्मविदांवराय नमः ।
ॐ ब्रह्मविद्यागुरवे नमः ।
ॐ गुह्याय नमः ।
ॐ गुह्यकैस्समभिष्टुताय नमः ।
ॐ कृतान्तकृते नमः ।
ॐ क्रियाधाराय नमः ।
ॐ कृतिने नमः ।७१०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ कृपणरक्षकाय नमः ।
ॐ नैष्कर्म्यदाय नमः ।
ॐ नवरसाय नमः ।
ॐ त्रिस्थाय नमः ।
ॐ त्रिपुरभैरवाय नमः ।
ॐ त्रिमात्रकाय नमः ।
ॐ त्रिवृद्रूपाय नमः ।
ॐ तृतीयाय नमः ।
ॐ त्रिगुणातिगाय नमः ।
ॐ त्रिधाम्ने नमः ।७२०

ॐ त्रिजगद्धेतवे नमः ।
ॐ त्रिकर्त्रे नमः ।
ॐ तिर्यगूर्ध्वगाय नमः ।
ॐ प्रपञ्चोपशमाय नमः ।
ॐ नामरूपद्वयविवर्जिताय नमः ।
ॐ प्रकृतीशाय नमः ।
ॐ प्रतिष्ठात्रे नमः ।
ॐ प्रभवाय नमः ।
ॐ प्रमथाय नमः ।
ॐ प्रथिने नमः ।७३०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सुनिश्चितार्थाय नमः ।
ॐ राद्धान्ताय नमः ।
ॐ तत्वमर्थाय नमः ।
ॐ तपोमयाय नमः ।
ॐ हिताय नमः ।
ॐ प्रमात्रे नमः ।
ॐ प्राग्वर्तिने नमः ।
ॐ सर्वोपनिषदाशयाय नमः ।
ॐ विशृङ्खलाय नमः ।
ॐ वियद्धेतवे नमः ।७४०
ॐ विषमाय नमः ।
ॐ विद्रुमप्रभाय नमः ।
ॐ अखण्डबोधाय नमः ।
ॐ अखण्डात्मने नमः ।
ॐ घण्टामण्डलमण्डिताय नमः ।
ॐ अनन्तशक्तये नमः ।
ॐ आचार्याय नमः ।
ॐ पुष्कलाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सर्वपूरणाय नमः ।
ॐ पुरजिते नमः ।७५०
ॐ पूर्वजाय नमः ।
ॐ पुष्पहासाय नमः ।
ॐ पुण्यफलप्रदाय नमः ।
ॐ ध्यानगम्याय नमः ।
ॐ ध्यातृरूपाय नमः ।
ॐ ध्येयाय नमः ।
ॐ धर्मविदांवराय नमः ।
ॐ अवशाय नमः ।

ॐ स्ववशाय नमः ।
ॐ स्थाणवे नमः ।७६०
ॐ अन्तर्यामिणे नमः ।
ॐ शतक्रतवे नमः ।
ॐ कूटस्थाय नमः ।
ॐ कूर्मपीठस्थाय नमः ।
ॐ कूष्माण्डग्रहमोचकाय नमः ।
ॐ कूलङ्कषकृपासिन्धवे नमः ।
ॐ कुशलिने नमः ।
ॐ कुङ्कुमेश्वराय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ गदाधराय नमः ।
ॐ गणस्वामिने नमः । ७७०
ॐ गरिष्ठाय नमः ।
ॐ तोमरायुधाय नमः ।
ॐ जवनाय नमः ।
ॐ जगदाधाराय नमः ।
ॐ जमदग्नये नमः ।
ॐ जराहराय नमः ।
ॐ जटाधराय नमः ।

ॐ अमृताधाराय नमः ।
ॐ अमृतांशवे नमः ।
ॐ अमृतोद्भवाय नमः । ७८०
ॐ विद्वत्तमाय नमः ।
ॐ विदूरस्थाय नमः ।
ॐ विश्रमाय नमः ।
ॐ वेदनामयाय नमः ।
ॐ चतुर्भुजाय नमः ।
ॐ शततनवे नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ शमिताखिलकौतुकाय नमः ।
ॐ वौषट्काराय नमः ।
ॐ वषट्काराय नमः ।
ॐ हुङ्काराय नमः ।७९०
ॐ फट्कराय नमः ।
ॐ पटवे नमः ।
ॐ ब्रह्मिष्ठाय नमः ।
ॐ ब्रह्मसूत्रार्थाय नमः ।
ॐ ब्रह्मज्ञाय नमः ।
ॐ ब्रह्मचेतनाय नमः ।

ॐ गायकाय नमः ।
ॐ गरुढारूढाय नमः ।
ॐ गजासुरविमर्दनाय नमः ।
ॐ गर्विताय नमः ।८००
ॐ गगनावासाय नमः ।
ॐ ग्रन्थित्रयविभेदनाय नमः ।
ॐ भूतमुक्तावलीतन्तवे नमः ।
ॐ भूतपूर्वाय नमः ।
ॐ भुजङ्गभृते नमः ।
ॐ अतर्क्याय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सुकराय नमः ।
ॐ साराय नमः ।
ॐ सत्तामात्राय नमः ।
ॐ सदाशिवाय नमः ।८१०
ॐ शक्तिपातकराय नमः ।
ॐ शक्ताय नमः ।
ॐ शाश्वताय नमः ।
ॐ श्रेयसांनिधये नमः ।
ॐ अजीर्णाय नमः ।
ॐ सुकुमाराय नमः ।
ॐ अन्यस्मै नमः ।
ॐ पारदर्शिने नमः ।
ॐ पुरन्दराय नमः ।
ॐ अनावरणविज्ञानाय नमः ।
ॐ निर्विभागाय नमः ।
ॐ विभावसवे नमः ।
ॐ विज्ञानमात्राय नमः ।
ॐ विरजसे नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ विरामाय नमः ।
ॐ विबुधाश्रयाय नमः ।
ॐ विदग्धमुग्धवेषाढ्याय नमः ।
ॐ विश्वातीताय नमः ।
ॐ विशोकदाय नमः ।
ॐ मायानाट्यविनोदज्ञाय नमः ।
ॐ मायानाटनशिक्षकाय नमः ।
ॐ मायानाटककृते नमः ।
ॐ मायिने नमः ।
ॐ मायायन्त्रविमोचकाय नमः ।

ॐ वृद्धिक्षयनिर्मुक्ताय नमः ।
ॐ विद्योताय नमः ।
ॐ विश्ववञ्चकाय नमः ।
ॐ कालात्मने नमः ।
ॐ कालिकानाथाय नमः ।
ॐ काकेटिकविभूषणाय नमः ।
ॐ षडूर्मिरहिताय नमः ।
ॐ स्तव्याय नमः ।
ॐ षट्गुणैश्वर्यदायकाय नमः ।
ॐ षडाधारगताय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सांख्याय नमः ।
ॐ षडक्षरसमाश्रयाय नमः ।
ॐ अनिर्देश्याय नमः ।
ॐ अनिलाय नमः ।
ॐ अगम्याय नमः ।
ॐ अविक्रियाय नमः । ८५०
ॐ अमोघवैभवाय नमः ।
ॐ हेयादेयविनिर्मुक्ताय नमः ।
ॐ हेलाकलिततापडवाय नमः ।
ॐ अपर्यन्ताय नमः ।
ॐ अपरिच्छेद्याय नमः ।
ॐ अगोचराय नमः ।
ॐ रुग्विमोचकाय नमः ।
ॐ निरंशाय नमः ।
ॐ निगमानन्दाय नमः ।
ॐ निरानन्दाय नमः । ८६०
ॐ निदानभुवे नमः ।
ॐ आदिभूताय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ महाभूताय नमः ।
ॐ स्वेच्छाकलितविग्रहाय नमः ।
ॐ निस्पन्दाय नमः ।
ॐ प्रत्ययानन्दाय नमः ।
ॐ विर्निमेषाय नमः ।
ॐ निरन्तराय नमः ।
ॐ प्रबुद्धाय नमः ।
ॐ परमोदाराय नमः । ८७०
ॐ परमानन्दसागराय नमः ।
ॐ संवत्सराय नमः ।

ॐ कलापूर्णाय नमः ।
ॐ सुरासुरनमस्कृताय नमः ।
ॐ निर्वाणदाय नमः ।
ॐ निर्वृतिस्थाय नमः ।
ॐ निर्वैराय नमः ।
ॐ निरुपाधिकाय नमः ।
ॐ आभास्वराय नमः ।
ॐ परस्मै नमः । ८८०
ॐ तत्वाय नमः ।
ॐ आदिशाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ पशलाय नमः ।
ॐ पवये नमः ।
ॐ संशान्तसर्वसङ्कल्पाय नमः ।
ॐ संसदीशाय नमः ।
ॐ सदोदिताय नमः ।
ॐ भावाभावविनिर्मुक्ताय नमः ।
ॐ भारूपाय नमः ।
ॐ भाविताय नमः । ८९०
ॐ भराय नमः ।
ॐ सर्वातीताय नमः ।
ॐ सारतराय नमः ।
ॐ साम्बाय नमः ।
ॐ सारस्वतप्रदाय नमः ।
ॐ सर्वकृते नमः ।
ॐ सर्वभृते नमः ।
ॐ सर्वमयाय नमः ।
ॐ सत्वावलम्बकाय नमः ।
ॐ केवलाय नमः । ९००

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ केशवाय नमः ।
ॐ केलीकराय नमः ।
ॐ केवलनायकाय नमः ।
ॐ इच्छानिच्छाविरहिताय नमः ।
ॐ विहारिणे नमः ।
ॐ वीर्यवर्धनाय नमः ।
ॐ विनिघत्याय नमः ।
ॐ विगतभियै नमः ।
ॐ विपिपासाय नमः ।
ॐ विभावनाय नमः ।९१०

ॐ विश्रान्तिभुवे नमः ।
ॐ विवसनाय नमः ।
ॐ विहनहन्त्रे नमः ।
ॐ विशोधकाय नमः ।
ॐ वीरप्रियाय नमः ।
ॐ वीतभयाय नमः ।
ॐ विन्ध्यदर्पविनाशनाय नमः ।
ॐ वेतालनटनप्रीताय नमः ।
ॐ वेतण्डत्वक्कृता-
म्बराय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ वेलातिलङ्घिकरुणाय नमः ।
ॐ विलासिने नमः ।
ॐ विक्रमोन्नताय नमः ।
ॐ वैराग्यशेवधये नमः ।
ॐ विश्वभोक्त्रे नमः ।
ॐ सर्वोर्ध्वसंस्थिताय नमः ।
ॐ महाकर्त्रे नमः ।
ॐ महाभोक्त्रे नमः ।
ॐ महासंविन्मयाय नमः ।
ॐ मधवे नमः ।
ॐ मनोवचोभिरग्राह्याय नमः ।
ॐ महाबिलकृतालयाय नमः ।
ॐ अनहंकृतये नमः ।
ॐ अच्छेद्याय नमः ।
ॐ स्वानन्दैकघनाकृतये नमः ।
ॐ संवर्ताग्न्युदराय नमः ।
ॐ सर्वान्तरस्थाय नमः ।
ॐ सर्वदुर्ग्रहाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सम्पन्नाय नमः ।

ॐ संक्रमाय नमः ।

ॐ सत्रिणे नमः ।९४०

ॐ सन्धात्रे नमः ।

ॐ सकलोर्जिताय नमः ।

ॐ सम्प्रवृद्धाय नमः ।

ॐ सन्निकृष्टाय नमः ।

ॐ संविमृष्टाय नमः ।

ॐ समग्रदृशे नमः ।

ॐ संयमस्थाय नमः ।

ॐ सन्दुदिस्थाय नमः ।

ॐ सम्प्रविष्टाय नमः ।

ॐ समुत्सुकाय नमः ।९५०

ॐ सम्प्रदुष्टाय नमः ।

ॐ सन्निविष्टाय नमः ।

ॐ संस्पष्टाय नमः ।

ॐ सम्प्रमर्दनाय नमः ।

ॐ सूत्रभूताय नमः ।

ॐ स्वप्रकाशाय नमः ।

ॐ समशीलाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ सदादयाय नमः ।
ॐ सत्वसंस्थाय नमः ।
ॐ सुषुप्तिस्थिताय नमः ।९६०
ॐ सुतल्याय नमः ।
ॐ सत्वस्वरूपगाय नमः ।
ॐ सङ्कल्पोल्लासनिर्मुक्ताय नमः ।
ॐ समनीरागचेतनाय नमः ।
ॐ आदित्यवर्णाय नमः ।
ॐ संज्योतिषे नमः ।
ॐ सम्यग्दर्शनतत्पराय नमः ।
ॐ महातात्पर्यनिलयाय नमः ।
ॐ प्रत्यग्ब्रह्मैक्यनिश्चयाय नमः ।
ॐ प्रपञ्चोल्लासनिर्मुक्ताय नमः ।
ॐ प्रत्यक्षाय नमः ।
ॐ प्रतिभात्मकाय नमः ।
ॐ प्रवेगाय नमः ।
ॐ प्रमदार्धाङ्गाय नमः ।
ॐ प्रनर्तनपरायणाय नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ योगयोनये नमः ।

ॐ यथाभूताय नमः ।

ॐ यक्षगन्धर्ववन्दिताय नमः ।

ॐ जटिलाय नमः ।

ॐ चटुलापाङ्गाय नमः । ९८०

ॐ महानटनलम्पटाय नमः ।

ॐ पाटलांशवे नमः ।

ॐ पटुतराय नमः ।

ॐ पारिजातमूलगाय नमः ।

ॐ पापाटवीबृहद्दानवे नमः ।

ॐ भानुमत्कोटिकोटिभाय नमः ।

ॐ कोटिकन्दर्पसौभाग्य-
सुन्दराय नमः ।

ॐ मधुरस्मिताधराय नमः ।

ॐ लास्यामृताब्धि-
लहरीपूर्णेन्दवे नमः ।

ॐ पुण्यगोचराय नमः ।९९०

ॐ रुद्राक्षस्रङ्मया-
कल्पाय नमः ।

ॐ कह्लारकिरणाद्युतये नमः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ अमूल्यमणिसम्भास्वत-
फणीन्द्रकरकङ्कणाय नमः ।
ॐ चिच्छक्तिलोचना-
नन्दकन्दलाय नमः ।
ॐ कुन्दपाण्डराय नमः ।
ॐ अगम्यमहिमाम्भोधये नमः ।
ॐ अनौपम्ययशोनिधये नमः ।
ॐ चिदानन्दनटाधीशाय नमः ।
ॐ चित्केवलवपुर्धराय नमः ।
ॐ चिदेकरससम्पूर्णाय नमः ।
ॐ श्री शिवाय नमः ।
ॐ श्रीमहेश्वराय नमः । १०००

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्री नटेशपञ्चरत्नम्

वामे भूधरजा पुरश्च वृषराट् पश्चान्मुनिर्जैमिनिः श्रीमद्व्यासपतञ्जलीत्युभयतः वाय्वादिकोणेषु च । श्रीमत्तिल्लवनैकवासिमखिनः ब्रह्मादिवृन्दारकाः मध्ये स्वर्णसभापतिर्विजयते हृत्पुण्डरीके पुरे ॥

॥ श्रीनटेशार्पणमस्तु ॥

श्रीमच्चिदम्बरनटात् नटराजराजात् ।
विद्याधिपात् विविधमङ्गलदानशौण्डात् ।
पूर्णेन्दुसुन्दरमुखात् द्विजराजचूडात् ।
भर्गात्परं किमपि तत्वमहं न जाने ॥ १ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

डक्काविभूषितकरात् विषनीलकण्ठात् ।
फुल्लारविन्दनयनात् फणिराजवन्द्यात् ।

व्याघ्रांघ्रिपूज्यचरणात् शिवकुञ्चिताङ्घ्रेः ।
शम्भोः परं किमपि तत्वमहं न जाने ॥ २ ॥
श्रीनाथमृग्यचरणात् विधिमृग्यचूडात् ।
श्रीपुण्डरीकनिलयात् श्रितदुःखनाशात् ।
श्रीमद्गुहस्य जनकात् सुखदत्तराजात् ।
श्रीशात्परं किमपि तत्वमहं न जाने ॥ ३ ॥
श्रीमद्गणेशजनकात् मखिवृन्दपूज्यात् ।
तिल्लीटवीसुनिलयात् त्रिपुराम्बिकेशात् ।
व्याघ्राजिनाम्बरधरात् उरुरोगनाशात् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रुद्रात्परं किमपि तत्वमहं न जाने ॥ ४ ॥
श्रीमद्व्याघ्रपुरेश्वरात् फणिराजभूषात् ।
संसाररोगभिषजः निखिलाण्डपालात् ।
श्रीमद्धेमसभेश्वरात् ललिताम्बिकेशात् ।
स्थाणोः परं किमपि तत्वमहं न जाने ॥ ५ ॥
पञ्चरत्नं नटेशस्य सोमशेखरयज्वभिः ।
संस्तुतं यः पठेन्नित्यं शाश्वतं तस्य मङ्गलम् ॥ ६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ श्री मुरुकाष्टकम् ॥

सिद्धिबुद्धिप्रदं देवं सुब्रह्मण्याग्रजं प्रभुम् ।
सोमाग्रतनयं वन्दे विघ्नराजमहर्निशम् ॥ १ ॥
मुकारस्तु मुकुन्दस्स्यात् रुकारो रुद्रवाचकः ।
ककारस्तु ब्रह्मवादी मुरुको गुहवाचकः ॥ २ ॥
मरुकः श्रीमतान्नाथ भोगमोक्षप्रदप्रभो ।
देवदेव महासेन पाहि पाहि सदा विभो ॥ ३ ॥
मुरुकं मुक्तिदं देवं मुनीनां मोदकं प्रभुम् ।
मोचकं सर्वदुःखानां मोहनाशं सदा नुमः ॥ ४ ॥
मुरुकेण मुकुन्देन मुनीनां हार्दवासिना ।
वल्लीशेन महेशेन पालितास्सर्वदा वयम् ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मुरुकाय नमः प्रातः मुरुकाय नमो निशि ।
मुरुकाय नमः सायं मुरुकाय नमो नमः ॥ ६ ॥
मुरुकात्परात्सत्यात् षण्मुखात् शिखिवाहनात् ।
गुहात्परं न जानेऽहं तत्वं किमपि सर्वदा ॥ ७ ॥
मुरुकस्य महेशस्य वल्लीसेनापतेः प्रभोः ।
चिदम्बर विलासस्य चरणौ सर्वदा भजे ॥ ८ ॥
मुरुके षण्मुखे देवे शिखिवाहे द्विषड्भुजे ।
कृत्तिकातनयेशम्भौ सर्वदा रमतां मनः ॥ ९ ॥
मुरुकस्याष्टकमिदं सोमशेखरयज्वभिः ।
संस्तुतं यः पठेन्नित्यं शाश्वतं तस्य मङ्गलम् ॥ १० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ इति श्रीमुरुकाष्टकं समाप्तम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१ अन्नपूर्णासहस्रनामस्तोत्रम् । नामावलीसहितम्
२ गोपालसहस्रनामस्तोत्रम् । नामावलीसहितम्
३ गायत्रीसहस्रनामस्तोत्रम् । नामावलीसहितम्
४ आञ्जनेयसहस्रनामस्तोत्रम् । नामावलीसहितम्
५ कालिकासहस्रनामस्तोत्रम् । नामावलीसहितम्
६ सीतासहस्रनामस्तोत्रम् । नामावलीसहितम्
७ सरस्वतीसहस्रनामस्तोत्रम् । नामावलीसहितम्
८ भवानीसहस्रनामस्तोत्रम् । नामावलीसहितम्
९ श्रीकृष्णसहस्रनामस्तोत्रम् । नामावलीसहितम्
१० लक्ष्मीनृसिंहसहस्रनामस्तोत्रम् । नामावलीसहितम्
११ बालासहस्रनामस्तोत्रम् । नामावलीसहितम्
१२ शनैश्चरसहस्रनामस्तोत्रम् । नामावलीसहितम्
१३ शिवसहस्रनामस्तोत्रम् । नामावलीसहितम्
१४ सूर्यसहस्रनामस्तोत्रम् । नामावलीसहितम्
१५ ललितासहस्रनामस्तोत्रम् । नामावलीसहितम्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA